## कूलसूदस्थलकर्षाः सञ्ज्ञायाम् । (१२९/३८६३)

कूल सूद स्थल कर्ष इत्येतानि उत्तरपदानि तत्पुरुषे समासे सञ्ज्ञायां विषये आद्युदात्तानि भवन्ति । दाक्षिकूलम् । माहकिकूलम् । देवसूदम् । [1]भाजीसूदम् । [2]दाण्डायनस्थली । माहकिस्थली । दाक्षिकर्षः । ग्रामनामधेयानि एतानि । स्थलग्रहणे लिङ्गविशिष्टत्वात् स्थलीशब्दोऽपि गृह्यते । जानपदकुण्ड (४.१.४२/५००) इत्यनेन ङीष् । सञ्ज्ञायाम् इति किम् ? परमकूलम् ॥

## अकर्मधारये राज्यम् । (१३०/३८६४)

कर्मधारयवर्जिते तत्पुरुषे समासे राज्यम् इत्येतदुत्तरपदम् आद्युदात्तं भवति । ब्राह्मणराज्यम् । क्षत्रियराज्यम् । अकर्मधारये इति किम् ? परमराज्यम् । चेलराज्यादिस्वरादव्ययस्वरो भवति पूर्वविप्रतिषेधेन (म.भा. ३.१३४) । कुचेलम् । कुराज्यम् ॥

## वर्ग्यादयश्च । (१३१/३८६५)

वर्ग्य इत्येवमादीनि उत्तरपदानि अकर्मधारये तत्पुरुषे समासे आद्युदात्तानि भवन्ति । वासुदेववर्ग्यः । वासुदेवपक्ष्यः । अर्जुनवर्ग्यः । [3]अर्जुनपक्ष्यः । अकर्मधारये इत्येव, परमवर्ग्यः । वर्ग्यादयः [4]प्रातिपदिकेषु न पठ्यन्ते । दिगादिषु (४.३.५४/१४२९) [5]तु वर्ग पूग गण पक्ष इत्येवमादयो ये पठिताः, ते एव यत्प्रत्ययान्ता वर्ग्यादयः इह [6]प्रतिपत्तव्या ॥

## पुत्रः पुम्भ्यः । (१३२/३८६६)

पुत्रशब्दः पुंशब्देभ्य उत्तरस्तत्पुरुषे [7]आद्युदात्तो भवति । कौनटिपुत्रः । दामकपुत्रः । [8]माहिषकपुत्रः । पुत्रः इति किम् ? कौनटिमातुलः । पुम्भ्यः इति किम् ? गार्गीपुत्रः । वात्सीपुत्रः ॥

## नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः । (१३३/३८६७)

[9]आचार्यः उपाध्यायः । राजा ईश्वरः । ऋत्विजो याजकाः । संयुक्ताः स्त्रीसम्बन्धिनः श्यालादयः । ज्ञातयो मातृपितृसम्बन्धिनो बान्धवाः । [10]आचार्याद्याख्येभ्यः परः पुत्रशब्दो नाद्युदात्तो भवति । आख्याग्रहणात् [11]स्वरूपस्य [12]पर्यायाणां विशेषाणां च ग्रहणं भवति । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । [13]नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्तपुत्रः । [14]सम्बन्धिपुत्रः । श्यालपुत्रः । ज्ञातिपुत्रः । [15]भ्रातुष्पुत्रः । ' ऋतो विद्यायोनिसम्बधेभ्यः (६. ३. २३/९८१) । इति षष्ठ्या अलुक् । पुत्रस्वरे प्रतिषिद्धे समासान्तोदात्तत्वमेव भवति ॥

---

1. उदाहरणमिदं नास्ति ह. 2. उदाहरणमिदं नास्ति फ. 3. अर्जुनपक्षः क. 4. प्रातिपदिकशब्देषु फ. 5. तु नास्ति फ. 6. पठ्यन्ते ह. 7. समासे इत्यधिकम् क.फ.ह. 8. माहिषपुत्रः नास्ति फ, माहिषिपुत्रः ड. 9. पूर्वेण प्रसक्तस्य प्रतिषेधोऽयम् इत्यधिकम् ह.फ, आचार्यः – बान्धवाः नास्ति ह. 10. आचार्यादिभ्यः क.फ.ह. 11. तस्य ह, स्वरूपस्य नास्ति फ. 12. तद्विशेषणानां फ. 13. नन्दपुत्रः नास्ति फ. 14. सम्बन्धि–पुत्रः नास्ति फ. 15. बान्धवपुत्रः ब.